International Journal of Research in Social Sciences
Vol. 13 Issue 12, December 2023,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# प्राग्वैदिककाले ज्योतिःशास्त्रस्य स्वरुपम्

Dr Biswaranjan Pati

Associate Professor, Dept of Jyotish

प्राग्वैभबकालः हि वेदमन्त्रसङ्ग्रहादपि प्राचिनतरः कालः । न स हि अस्माकं ज्ञानविषयः । तदा ज्योतिषशास्त्रस्य तु का वार्ताऽपि तु तद्योनेर्वेदस्य एव किं स्वरुपमासीदित्यपि अनुमातुं वयं नैव प्रभवामः । एतावदेव तद्विषये वक्तुं पार्यते यत् तदा अपि स्वल्पमपि ज्ञानमवश्यमेव आसीत् यस्य यथायथं वा विकसितं रुपं वेदमन्त्रेषु दृश्यते । अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह, सुर्याचन्द्रमसौ घाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्च अन्तरिक्षमथो स्वः । सम्मत्यपि ग्रामीणजनाः दिगवबोघाय ध्रुवादि नक्षत्राणां समयज्ञानाय रात्रौ कृत्तिकानां साहाय्यं स्वीकुर्वन्ति स्म । दिवा तु ते सूर्यगर्तिं विज्ञाय समयज्ञानं कुर्वन्ति । ऋग्वेदे देवानां पूर्वे युगेऽसतःसदजायत इति यत्कथितं यञ्च यः पश्यादुत्तरे युगे इत्यप्युक्तं तस्यायमेवाशयो भवितुमर्हति यद्वैदिकसंहितापूर्ववर्त्ति कालेऽपि काचन विशिष्टा सभ्यता आसीत् इति ।

वेदा हि नैव निश्चयेन ज्योतिषशास्त्रं व्याख्यातं स्यात् । तथापि इतरविषयप्रसङ्गवशात् ज्योतिषविषये अपि यत्किञ्चिदुक्तं तेन एतत् ज्ञायते यत् तदापि शास्त्रे अस्मिन् मानवीयं ज्ञानं समृद्धमासीत् । तत्र तत्र आकाशमण्डलं सूर्यचन्द्रमसौ नक्षत्राणि ताराः ऋतून् मासान् दिवसांश्चआदाय मनोहारि चमत्कारि वर्णनं समुपलभ्यते । प्रकरणे अस्मिन् वेदशब्देन कात्यायनप्रतिज्ञासुत्रमनुसृत्य तस्य संहिता ब्राह्मणभागी ग्रहीतौ मन्त्रब्राह्मणयोर्वेदनामधेयम् इत्युक्तेः ।

आकाशमधिकृत्य तत्र उक्तं पद्यः सः आकाशः स आदित्यः एव इति । एतस्मिन् उदिते सर्वमिदम् आकाशते । स इन्द्रः एव इति । तेन हि आकाशते द्योतते इत्याकाशः । तत्र पृथिव्याः उपरिष्टात् अन्तरिक्षस्य तदुपरिष्टात् दिवः प्रतिष्टा वर्णिता । दिवि मेघस्य अन्तरिक्षे वायोश्च स्थितिः अपि वर्णितः दृश्यते । यथा –

**नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।**[1]
**नमोस्तु रुद्रेभ्यो योऽन्तरिक्षे येषां वात इषवः ॥**[2]

**एवमेव द्यावापृथिवीविषये तत्रोक्तम्**

**यदा वै द्यावापृथिवी संज्ञानायेऽथ वर्षति ।**[3]

**प्राणोदानौ वै द्यावपृथिवी ।**[4]

इमौ वै लोकौ रेतः सिञ्चविमौ ह्येव लोकौ रेतः सिञ्चत इतो वा अयमूर्ध्व रेतः सिञ्चति घुमं साऽमुत्र वृष्टिं तदिमा अन्तरेण प्रजायन्ते ।[5]

---

[1]य.वे.16.65
[2]य.वे.16.65
[3]श.वा.1.8.3.12
[4]श.वा14.2.2.36

[5]श.वा.7.4.2.22

**ऋग्वेदेऽप्युक्तम् –**

**तिस्रो द्यावः सवितुद्वर्वा उपस्था एका यमस्य भुवने विराषाट् ।**

**आणि न रथ्यममृताभितस्थुः ।**[6]

विराजमधिकृत्य तत्रोक्तम् –

**नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौ समवर्तत ।**

**पद्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन् ॥**[7]

**चन्द्रमा मनसो जातश्चक्षो सूर्यो अजायत ।**

**श्रोत्राद्वायुश्च प्राणञ्च मुखादग्निरजायत ॥** [8]

ऐतरेयब्राह्मणे उक्तम् –

**द्यौरन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्याम् ।**[9]

एवमेव तत्र तत्र संवत्सरमासर्तुपक्षाहोरात्रसूर्यचन्द्रादिबिषयेऽपि सुनिपुणं वर्णितं द्दश्यते । तत्र तत्र युगाद्विषये च चर्चा उपलभ्यते । यथा हि

**दोवानां पूर्वे युगे सतः सदजायत ।**[10]

**तद्गचुषे मानुषेमा युगानि ।**[11]

मन्त्रभागेषु एतेषु युगशब्दः कालविशेषवाचकत्वेन स्वीकृतः द्दश्यते । देवयुगयोः तथा मानुषयुगयोः च अन्तरमपि तत्र निर्दिष्टं लभ्यते । पूर्वे युगे उत्तरे युगे इत्यादि कथने युगशब्देन निश्चितः कालमानः एव निर्दिष्टः अस्ति । यत्र कुत्र युगशब्दः सत्यत्रेताद्वापरावबोधक एव । वैदिकमन्त्रेषु यत्र तत्र युगभेदत्वेन कृतादिशब्दानामपि प्रयोगः दृश्यते । यथा वाजसेनीयसंहितायाम् –

**अक्षराजाय कितवं कृतायादिनवदर्श त्रेतायै कल्पिनं द्वापरायाधिकल्पिनम् ।**[12]

ऐतरेयब्राह्मणे तु एवं दृश्यते –

**कलिः शयानो भवति सञ्जिहानस्तु द्वापरः ।**

**उत्तिष्टंस्त्रेता भवति कृतं सम्पद्यते चरन् ॥**

**चरैवेति चरैवेति ।**[13]

[6]**ऋ.वे.1.35.6**
[7]**ऋ.10.90.14**
[8]**ऋ.वे.10.10.13**
[9]**ऐ.वा.11.6**
[10]**ऋ.वे.10.72.2**
[11]**ऋ.वे.1.103.4**
[12]**वा.सं.30.18**
[13]**ऐ.वा.33.15**

International Journal of Research in Social Sciences
Vol. 13 Issue 12, December 2023,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

ऋग्वेदादौ युगावयवत्वेन संवत्सरादयः अपि उल्लिखिताः दृश्यन्ते । वेदाङ्गज्योतिषे तु एवं उक्तं दृश्यते पाञ्चसंवत्सरं युगमिति तस्य बीजं वेदेषु दृश्यते । यथा हि –

**संवत्सरस्य तदहः परिष्ठ यन्मण्डूकाः प्रावृषीणं बभुव ।**

**ब्राह्मणासः सोमिनो वाचमकतबह्म कृण्वन्तः परिवत्सरीणम् ।**[14]

कालवाचकत्वेन वर्षशव्दः शतपथब्राह्मणादौ प्रयुक्तः दृश्यते ।एवमेव ऋग्वेदे हि ऋतुवाचकशरत्प्रभृतिशव्दाः अपि वर्षवाचकत्वेन उपयुक्ताः दृश्यन्ते । गोपथब्राह्मणे तु वर्षार्ये हायनशव्दः शुक्लयजुर्वेदे सम शव्द च प्रयुक्तः । यथा –

**तेषां श्रीर्मयि कल्पतामस्मिन् लोको शतं समाः ।**[15]

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।**[16]

एवं ऋग्वेदे अपि समशव्दः संवत्सरम् इत्यर्थे प्रयुक्तः । एवमेव ऋतुविषये अपि वैदिकसाहित्ये बहुधा उक्तं दृश्यते । तैतीरियसंहितायाम् उक्तं यत् संवत्सरे षड् ऋतवः भवन्ति द्वादशमासाश्च ।

यदा कदा त्रयोदशापि ।

**षड्रात्रिर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः**

**द्वादशरात्रिर्द्रीक्षितस्यादु द्वादश मासाः संवत्सरः ।**

**त्रयोदशरात्रीर्दीक्षितः स्यात् त्रयोदश मासाः संवत्सरः ।**

**चतुर्विंशतिरर्धमासाः संवत्सरः...मासं दीक्षितः स्याद्यो मासः स संवत्सरः ।**[17]

एवञ्च तत्रैव षड्ऋतवो द्वादश मासाश्च नाम्नापि परिगणिता दृश्यन्ते । यथा तैत्तिरीये

**मधुश्च माघवश्च शुकश्च शुचिश्च नभश्च**

**नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च**

**तपश्च तपस्यश्च .... संसर्पोऽस्यंहस्पत्याय त्वा ।**[18]

**तत्र संसर्पो मलमासः अहंस्पतिः क्षयमास इति माघवः ।**

एवमेव

**मधुश्च माघवश्च वासन्तिकावृत् शुकश्च शुचिश्च ग्रीष्मावृत**

**नभश्च नभस्यश्च बार्षिकीवृत् सहश्च सहस्यश्च हेमन्तिकावृत्**

**तपश्च तपस्यश्च शैशिरावृत् ।**[19] **तथैव ऋग्वेदे अपि उक्तम् दृश्यते –**

---

[14]**ऋ.वे.7.103.7**
[15]**शु.य.वे.40.2**
[16]**शु.य.वे.40.2**
[17]**तै.स.5.6.7**
[18]**तै.सं.1.4.4**

**वेदमासो घृतवते द्वादशप्रजावतः ।**

**वेदा य उपजायते ।**[20]

द्वादशारं न हि तज्जराय वर्षति चक्रं परिद्यामृतस्य । आ पुत्राः अग्ने मिथनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ।[21]

द्वादश प्रधयश्चक्रमेकं त्रिणी नम्यानि क उ तश्चिकेत तस्मिन् साकं त्रिशता न शङ्कवोऽर्पिता षष्टिर्न चलाचलासः ।[22]

संवत्सरं ह्येकं चकं, तस्य हि द्वादश प्रधयश्चैत्रादयः त्रीणी नम्यानि चैत्रादारभ्य मासच्तुष्करुपाणि चातुर्मास्यित्रिकमिति । तस्य हि त्रिशतं षष्टिश्च शङ्कवः दिवसाः चला अचलाश्च रात्रयस्तावत्य एवेति सप्तशतं विंशतिश्च ता इति । तैत्तिरीयसंहितायां स्पष्टमेवोक्तम् –

तस्य त्रिणी च शतानि षष्टिश्च स्तोत्रीयास्तावतिः संवत्सरस्य रात्रयः ।[23] (7/5/1)

वाजसेनसंहितायामपि त्रयोदशमासा नाम्ना गणिताः । यथा –

**उपयामगृहितोऽसि मधवे त्वोपयामगृहितोऽसि शुक्राय त्वोपयामगृहितोऽसीधे त्वोपयामगृहितोऽस्मूर्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्यायत्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयामगृहीतोऽसि अंहस्पतये त्वा ।**[24]

अनेन एतत् सिध्यति यद् वैदिकसंहिताकाले तु द्वादशात्मकं सौरवर्षं प्रचलितमासीत् यत्र षष्टयधिक त्रिशतदिनानि परिगणितानि आसन् । सूर्योदयादारभ्य सुर्योदयान्तरपर्यन्तकाल एव तत्र दिवसपदेन गृहीतः अनुमीयते । मासः तु तदा चान्द्र एव आसीत् । तद्गणना कमः च चन्द्रमसः पूर्णत्वाधारेण । तस्य पुर्णद्वयाभ्यन्तरवर्ती काल एव मासः । तद्वत् ऋतूनामेकः परिक्रमावधिरेव वर्षम् । ऋतूनां हि सूर्यः योनिः भवति । चान्द्रसौरवर्षसमीकरणायैव त्रयोदशतमो मासः अपि तत्र परिकल्पितः । तेनैव उक्तम् " रविणा लङ्गितो मासश्चान्द्रो ख्यातो मलिम्लुचः शुद्धोऽन्यः " । इति च । वेदे हि अधिमासस्य कृते संसर्पः अंहस्पतिश्च शब्दो पर्यायवाचकत्वने प्रयुक्तौ । यदा कस्यचिन्मासस्य क्षयस्तदा हि द्वावधिकमासौ भवतः । तयोराद्यः संसर्पोऽपरोऽहस्पतिरिति परम्परा । तेनैव उक्तम् स्यात् –**असङ्कान्तिर्द्विसङ्कान्ती** संसर्पाहस्पती समाविति । **शङ्करवालकृष्णो** निर्दिशति यत्तदा चान्द्रसौरवर्षातिरिक्तं सावनशब्दः अहोरात्रोपलक्षकः । अहोरात्रसाध्यः एकः समोयागः अहः शब्देन अभिधीयते । तादृशानाम् अहर्विशेषाणां गणः षडहः षडहेन पञ्चकेनैकः मासः । तादृशैः द्वादशभिः मासैः साध्यं संवत्सरसत्रमिति माधवाचार्यः स्फष्टयति । तदित्थं सावनवर्षे 360 दिनानि भवन्ति ।

वैदिकसाहित्ये अयनविषयेऽपि बहुक्तं दृश्यते । शतपथब्राह्मणे हि वसन्तग्रीष्मवर्षासु सूर्यस्योदगवर्तनं देवेषु स्थितिः शरद्धेमन्तशिशिरेषु तस्य दक्षिणावर्तनं पितृष्ववस्थितिः च उक्ता । तथैव तैत्तिरीयसंहितायामपि

[19]**तै.सं.4.4.11**
[20]**1.25.8**
[21]**ऋ.वे.1.164.11**
[22]**1.164.48**
[23]**तै.सं.7.5.1**
[24]**वा.सं.7.30**

**International Journal of Research in Social Sciences**
**Vol. 13 Issue 12, December 2023,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**" तस्यादित्यः षण्मासो दक्षिणेनेति षड्त्तरेण "**[25]इति । उक्तम् । यदा हि सूर्यः विषुववृत्तस्य उत्तरतः तदा उत्तरायणं यदा तु दक्षिणतस्तदा दक्षिणायनमित्यास्य सारम् । उत्तरायणमेव देवानां दिनं यदा दक्षिणायनं तेषां रात्रिः इति । उभयमादाय देवानामेकं दिनम् । अयनशव्दः हि वेदे गृहपर्यायित्वेन प्रयुक्तः दृश्यते ।

वैदिकसाहित्ये न हि कुत्रापि अयन परिवर्तनं कुत्र भवति इति स्पष्टतया उल्लिखितम् । कदा आरभ्य संवत्सरः प्रवर्तते इत्यपि नैव स्पष्टं प्रमाणम् । शतपथब्राह्मणे एतावदेव निर्दिष्टं यद् उत्तरायणे वसन्तग्रीष्मवर्षाःऋतवः । दक्षिणायने तु शतदहेमन्तशिशिराः ऋतवः इति । किन्तु वसन्तर्तुः कदा आरभ्यते कदा वा समाप्यते इत्यस्मिन् विषये तत्र स्पष्टतया न उत्त्कमेव । तैत्तिरीयब्राह्मणानुसारेण उत्तरफाल्गुनी हि संवत्सरस्य मुखं पूर्वा च पुच्छमिति । एतदनुसारेण फाल्गुनपौर्णमासीमभितः संवत्सरारम्भः अनुमितः । वराहमिहिराचार्यः स्मरति –

**आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्टायाम् ।**

**नुनं कदाचिदासीद्योनोक्तं पूर्वशास्त्रेषु ।**

**साम्मतयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत् ।**

**उत्त्काभावो विकृतिः प्रत्यक्षपरिक्षणैर्व्यक्तिः ॥**

**दुरस्याचिह्नभेदादुदयेऽस्तमयेऽपि सहस्राशोः ।**

**छायाप्रवेशनिर्गमचिहैवां मण्डले महति । इति ॥[26] (वृ.सं. 3/1.3)**

इत्थं हि वेदानां संहिताभागे ब्राह्मणभागे च वहुविधा हि ज्योतिषविषयाः प्रसङ्गानुसारेण प्रतिपादिताः दृश्यन्ते । तत्र हि कालचक्रस्य युगे कल्पे संवत्सरे मासेऽहोरात्रे च विभागः कृतः । तत्र हि कालचक्रस्य विभागः युग-कल्पे-संवत्सर-मास-अहोरात्र इत्येव कृतः । एवमेव सूर्यः सोरपरिवारग्रहाःपृथिवी अन्तरिक्ष द्यौः च वर्णिताः। तत्रापि द्युस्थानीयस्य सूर्यस्य अन्तरिक्षस्थानीयस्य वायोः भूस्थानीयस्य अग्नेः विषयाः यथावसरं प्रतिपादिताः । तत्र उक्तम् सूर्यः हि परमं ज्योतिः स हि स्सर्व प्रीणाति प्रेरयति च । स एव वृष्टिकारकः । वेनादयः तस्य ग्रहाः । वेनः नाम शुक्रः एव । सूर्यः हि ऋतुनां कारणम् । सः सूर्य तु क्रान्तिवृत्तेन चलति इति कारणेन एव तारकाणां प्रकाशं लभन्ते । सूर्य – एव कालचक्रस्य विभाजनं युगस्य प्रवर्तनं च करोति । षड् ऋतवः भवन्ति सूर्यस्य । एकसन्तसङ्कान्तितः द्वितीयपर्यायवसन्तसङ्कान्तिप्रारम्भं यावत् संवत्सरः । मधुमाधवादयः द्वादशभागाः भवन्ति संवत्सरस्य । वसन्तग्रीष्मवर्षासु सूर्यो हि विषुवत् उदक् भवति । सः समयः तु दैवः समयः इति वदति । शरदहेमन्तशिशिरेषु सः दक्षिणमनुवर्तते । सः समयः तु पितृणां समयः इति वदति । प्रति ऋतुं द्वौ मासौ आहत्य षड् ऋतुनां द्वादशमासाः भवन्ति । कृष्णः शुक्लः इति द्वौ पक्षौ भवतः । तन्द्रमा तु सूर्यरश्मिः । स हि अमावास्यां सूर्य प्रविशति पुनः च ततः निःसृत्य याति प्रतिदिनं नियमितगत्या पैर्णमास्यां हि चन्द्रः सूर्याद्दूरतमं प्रदेशं प्राप्नोति । स हि पुनश्च प्रत्यावृत्य यदा हि सूर्य प्रविशति तदा अमावासी भवति । चन्द्रः तु सर्वदा नक्षत्रपथेन गच्छति । मुलत- नक्षत्राणि सप्तविंशतिः । एकैकस्यापि प्रत्येकम् उपनक्षत्रं च भवति । तारकान्तराणि अपि नक्षत्रेषु भवन्ति । यथा कृत्तिकासु सप्त विशाखायाः द्वौ । चन्द्रः तु यदा भचकं पूर्णतः अतिकाम्यति तदा चान्द्रः मासः पूर्णः भवति । सूर्यः हि चन्द्रमवलम्व्य वर्तते । सूर्ये हि चन्द्रपातान्तरित्वेन ग्रहणं प्राप्नोति । नक्षत्राणां ग्रहणां च फलं शुभाशुभभेदत्वेन

[25]**Lw.mx.6.5.3**
[26]**वृ.सं.3.1.3**

भवति । शुभे सुहूर्ते कृतं कर्म शुभमेव फलं साधयति । एवं हि कालचक्र-ग्रहण-स्वगोलादिविषयाः वेदेषु यथावसरं प्रतिपादिताः इति द्रष्टुं शक्नुवन्ति ।